श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ चतुर्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्विंशः सर्गः ॥

## शोकमग्नेन सुग्रीवेण श्रीरामं प्रति स्वप्राणानां परित्यागायानुमतेः प्रार्थनं तारया श्रीरामं प्रति स्ववधाय प्रार्थनाकरणं श्रीरामेण तस्याः प्रबोधनं च

तामाशु वेगेन दुरासदेन
त्वभिप्लुतां शोकमहार्णवेन।
पश्यंस्तदा वाल्यनुजस्तरस्वी
भ्रातुर्वधेनाप्रतिमेन तेपे ॥ **4.24.1** ॥

स बाष्पपूर्णेन मुखेन पश्यन्
क्षणेन निर्विण्णमना मनस्वी।
जगाम रामस्य शनैः समीपं
भृत्यैर्वृतः सम्परिदूयमानः ॥ **4.24.2** ॥

स तं समासाद्य गृहीतचाप -
मुदात्तमाशीविषतुल्यबाणम्।
यशस्विनं लक्षणलक्षिताङ्ग -
मवस्थितं राघवमित्युवाच ॥ **4.24.3** ॥

यथा प्रतिज्ञातमिदं नरेन्द्र
कृतं त्वया दृष्टफलं च कर्म।
ममाद्य भोगेषु नरेन्द्रसूनो
मनो निवृत्तं हतजीवितेन ॥ **4.24.4** ॥

अस्यां महिष्यां तु भृशं रुदत्यां
    पुरेऽतिविक्रोशति दुःखतप्ते।
हते नृपे संशयितेऽङ्गदे च
    न राम राज्ये रमते मनो मे ॥ **4.24.5** ॥

क्रोधादमर्षादतिविप्रधर्षाद्
    भ्रातुर्वधो मेऽनुमतः पुरस्तात्।
हते त्विदानीं हरियूथपेऽस्मिन्
    सुतीक्ष्णमिक्ष्वाकुवर प्रतप्स्ये ॥ **4.24.6** ॥

श्रेयोऽद्य मन्ये मम शैलमुख्ये
    तस्मिन् हि वासश्चिरमृष्यमूके।
यथा तथा वर्तयतः स्ववृत्त्या
    नेमं निहत्य त्रिदिवस्य लाभः ॥ **4.24.7** ॥

न त्वा जिघांसामि चरेति यन्मा -
    मयं महात्मा मतिमानुवाच।
तस्यैव तद् राम वचोऽनुरूप -
    मिदं वचः कर्म च मेऽनुरूपम् ॥ **4.24.8** ॥

भ्राता कथं नाम महागुणस्य
    भ्रातुर्वधं राम विरोचयेत।
राज्यस्य दुःखस्य च वीर सारं
    विचिन्तयन् कामपुरस्कृतोऽपि ॥ **4.24.9** ॥

वधो हि मे मतो नासीत् स्वमाहात्म्यव्यतिक्रमात्।
ममासीद् बुद्धिदौरात्म्यात् प्राणहारी व्यतिक्रमः ॥ **4.24.10** ॥

द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिष्टनन्।
सान्त्वयित्वा त्वनेनोक्तो न पुनः कर्तुमर्हसि ॥ **4.24.11** ॥

भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षितः।
मया क्रोधश्च कामश्च कपित्वं च प्रदर्शितम्॥ **4.24.12** ॥

अचिन्तनीयं परिवर्जनीय -
मनीप्सनीयं स्वनवेक्षणीयम्।
प्राप्तोऽस्मि पाप्मानमिदं वयस्य
भ्रातुर्वधात् त्वाष्ट्रवधादिवेन्द्रः॥ **4.24.13** ॥

पाप्मानमिन्द्रस्य मही जलं च
वृक्षाश्च कामं जगृहुः स्त्रियश्च।
को नाम पाप्मानमिमं सहेत
शाखामृगस्य प्रतिपत्तुमिच्छेत्॥ **4.24.14** ॥

नार्हामि सम्मानमिमं प्रजानां
न यौवराज्यं कुत एव राज्यम्।
अधर्मयुक्तं कुलनाशयुक्त -
मेवंविधं राघव कर्म कृत्वा॥ **4.24.15** ॥

पापस्य कर्तास्मि विगर्हितस्य
क्षुद्रस्य लोकापकृतस्य लोके।
शोको महान् मामभिवर्ततेऽयं
वृष्टेर्यथा निम्नमिवाम्बुवेगः॥ **4.24.16** ॥

सोदर्यघातापरगात्रवालः
सन्तापहस्ताक्षिशिरोविषाणः।
एनोमयो मामभिहन्ति हस्ती
दृप्तो नदीकूलमिव प्रवृद्धः॥ **4.24.17** ॥

अंहो बतेदं नृवराविषह्यं
निवर्तते मे हृदि साधुवृत्तम्।

अग्नौ विवर्णं परितप्यमानं
    किट्टं यथा राघव जातरूपम्॥ **4.24.18** ॥

महाबलानां हरियूथपाना -
    मिदं कुलं राघव मन्निमित्तम्।
अस्याङ्गदस्यापि च शोकतापा -
    दर्धस्थितप्राणमितीव मन्ये॥ **4.24.19** ॥

सुतः सुलभ्यः सुजनः सुवश्यः
    कुतस्तु पुत्रः सदृशोऽङ्गदेन।
न चापि विद्येत स वीर देशो
    यस्मिन् भवेत् सोदरसन्निकर्षः॥ **4.24.20** ॥

अद्याङ्गदो वीरवरो न जीवे -
    ज्जीवेत माता परिपालनार्थम्।
विना तु पुत्रं परितापदीना
    सा नैव जीवेदिति निश्चितं मे॥ **4.24.21** ॥

सोऽहं प्रवेक्ष्याम्यतिदीप्तमग्निं
    भ्रात्रा च पुत्रेण च सख्यमिच्छन्।
इमे विचेष्यन्ति हरिप्रवीराः
    सीतां निदेशे परिवर्तमानाः॥ **4.24.22** ॥

कृत्स्नं तु ते सेत्स्यति कार्यमेत -
    न्मय्यप्यतीते मनुजेन्द्रपुत्र।
कुलस्य हन्तारमजीवनार्हं
    रामानुजानीहि कृतागसं माम्॥ **4.24.23** ॥

इत्येवमार्तस्य रघुप्रवीरः
    श्रुत्वा वचो वालिजघन्यजस्य।

सञ्जातबाष्पः परवीरहन्ता
    रामो मुहूर्तं विमना बभूव ॥ **4.24.24** ॥

तस्मिन् क्षणेऽभीक्ष्णमवेक्षमाणः
    क्षितिक्षमावान् भुवनस्य गोप्ता।
रामो रुदन्तीं व्यसने निमग्नां
    समुत्सुकः सोऽथ ददर्श ताराम् ॥ **4.24.25** ॥

तां चारुनेत्रां कपिसिंहनाथां
    पतिं समाश्लिष्य तदा शयानाम्।
उत्थापयामासुरदीनसत्त्वां
    मन्त्रिप्रधानाः कपिराजपत्नीम् ॥ **4.24.26** ॥

सा विस्फुरन्ती परिरभ्यमाणा
    भर्तुः समीपादपनीयमाना।
ददर्श रामं शरचापपाणिं
    स्वतेजसा सूर्यमिव ज्वलन्तम् ॥ **4.24.27** ॥

सुसंवृतं पार्थिवलक्षणैश्च
    तं चारुनेत्रं मृगशावनेत्रा।
अदृष्टपूर्वं पुरुषप्रधान -
    मयं स काकुत्स्थ इति प्रजज्ञे ॥ **4.24.28** ॥

तस्येन्द्रकल्पस्य दुरासदस्य
    महानुभावस्य समीपमार्या।
आर्तातितूर्णं व्यसनं प्रपन्ना
    जगाम तारा परिविह्वलन्ती ॥ **4.24.29** ॥

तं सा समासाद्य विशुद्धसत्त्वं
    शोकेन सम्भ्रान्तशरीरभावा।

मनस्विनी वाक्यमुवाच तारा
    रामं रणोत्कर्षणलब्धलक्ष्यम् ॥ **4.24.30** ॥

त्वमप्रमेयश्च दुरासदश्च
    जितेन्द्रियश्चोत्तमधर्मकश्च।
अक्षीणकीर्तिश्च विचक्षणश्च
    क्षितिक्षमावान् क्षतजोपमाक्षः ॥ **4.24.31** ॥

त्वमात्तबाणासनबाणपाणि -
    र्महाबलः संहननोपपन्नः।
मनुष्यदेहाभ्युदयं विहाय
    दिव्येन देहाभ्युदयेन युक्तः ॥ **4.24.32** ॥

येनैव बाणेन हतः प्रियो मे
    तेनैव बाणेन हि मां जहीहि।
हता गमिष्यामि समीपमस्य
    न मां विना वीर रमेत वाली ॥ **4.24.33** ॥

स्वर्गेऽपि पद्मामलपत्रनेत्र
    समेत्य सम्प्रेक्ष्य च मामपश्यन्।
न ह्येष उच्चावचताम्रचूडा
    विचित्रवेषाप्सरसोऽभजिष्यत् ॥ **4.24.34** ॥

स्वर्गेऽपि शोकं च विवर्णतां च
    मया विना प्राप्स्यति वीर वाली।
रम्ये नगेन्द्रस्य तटावकाशे
    विदेहकन्यारहितो यथा त्वम् ॥ **4.24.35** ॥

त्वं वेत्थ तावद् वनिताविहीनः
    प्राप्नोति दुःखं पुरुषः कुमारः।

तत् त्वं प्रजानञ्जहि मां न वाली
    दुःखं ममादर्शनजं भजेत ॥ **4.24.36** ॥

यच्चापि मन्येत भवान् महात्मा
    स्त्रीघातदोषस्तु भवेन्न मह्यम्।
आत्मेयमस्येति हि मां जहि त्वं
    न स्त्रीवधः स्यान्मनुजेन्द्रपुत्र ॥ **4.24.37** ॥

शास्त्रप्रयोगाद् विविधाश्च वेदा -
    दनन्यरूपाः पुरुषस्य दाराः।
दारप्रदानाद्धि न दानमन्यत्
    प्रदृश्यते ज्ञानवतां हि लोके ॥ **4.24.38** ॥

त्वं चापि मां तस्य मम प्रियस्य
    प्रदास्यसे धर्ममवेक्ष्य वीर।
अनेन दानेन न लप्स्यसे त्व -
    मधर्मयोगं मम वीर घातात् ॥ **4.24.39** ॥

आर्तामनाथामपनीयमाना -
    मेवङ्गतां नार्हसि मामहन्तुम्।
अहं हि मातङ्गविलासगामिना
    प्लवङ्गमानामृषभेण धीमता।
विना वरार्होत्तमहेममालिना
    चिरं न शक्ष्यामि नरेन्द्र जीवितुम् ॥ **4.24.40** ॥

इत्येवमुक्तस्तु विभुर्महात्मा
    तारां समाश्वास्य हितं बभाषे।
मा वीरभार्ये विमतिं कुरुष्व
    लोको हि सर्वो विहितो विधात्रा ॥ **4.24.41** ॥

तं चैव सर्वं सुखदुःखयोगं
    लोकोऽब्रवीत् तेन कृतं विधात्रा।
त्रयोऽपि लोका विहितं विधानं
    नातिक्रमन्ते वशगा हि तस्य॥ **4.24.42** ॥

प्रीतिं परां प्राप्स्यसि तां तथैव
    पुत्रश्च ते प्राप्स्यति यौवराज्यम्।
धात्रा विधानं विहितं तथैव
    न शूरपत्न्यः परिदेवयन्ति॥ **4.24.43** ॥

आश्वासिता तेन महात्मना तु
    प्रभावयुक्तेन परन्तपेन।
सा वीरपत्नी ध्वनता मुखेन
    सुवेषरूपा विरराम तारा॥ **4.24.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुर्विंशः सर्गः॥